रत्नमन्त्राश्च कीर्त्तिताः । पूर्ववत् पञ्चपत्रस्थः कर्त्तव्यश्च तिथीश्वर । गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते" ।
हरिव्रतं वराहपु० "त्रैलोक्यगामिनी देवी लक्ष्मीर्योऽस्तु सदा प्रिया । द्वादशी च तिथिर्योऽस्तु कामरूपी च जायते" । हरिं प्रतीदं वचनम् "हुताशनो भवेद् यस्तु द्वादश्यां तत्परायणः । स स्वर्गवासी भवति पुमान् स्त्री वा विशेषतः" ।
हरिकालीव्रतं भविष्योत्तरे "शुक्ले भाद्रपदस्यैवं तृतीयायां समाचरेत् । रक्तधान्यैः सर्वेरूढैः कृत्वा विहितशाड्वले । खर्जूरैर्नारिकेलैश्च फलैश्च मधुरैस्तथा । मातुलाङ्गकुसुमैर्धान्यकैर्जम्बुकैस्तथा । गन्धैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः । प्रीणयित्वा समासाद्य पञ्चरागेण भाविता । अष्टावाद्यादिभिर्गीतैः शुभैर्दिव्यैः कथानकैः । पूजनीया महाराज ! मन्त्रेणानेन भक्तितः । हरेनाम्नः समुत्पन्ने ! हरिकालि ! हरिप्रिये ! । सर्वदा सर्वभूतस्थे ! प्रणतार्त्तिहरे ! नमः । इत्थं संपूज्य तां देवीं दत्त्वाहि प्राय दक्षिणाम् । कृत्वा जागरणं रात्रौ प्रभाते किञ्चिदुद्गते । रात्रौ सुवासिनीभिश्च सा नेया तु जलाशये । ततो जलाशये रम्ये मन्त्रेणैव विसर्जयेत् । अर्च्चिता च मया भक्त्या गच्छ देवि ! सुरालयम् । मम सौभाग्यनाशाय पुनरागमनाय च । एवं यः पाण्डवश्रेष्ठ ! हरिकालीव्रतं चरेत् । प्रतिवर्षं विधानेन नारी वा भक्तितत्परा । नीत्वा यत् फलमाप्नोति तदन्येन न लभ्यते" ।

## परिशिष्टम् ।

आमलकैकादशीव्रतं स्कन्दपु० प्रभासख० "फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः । स्नात्वा नद्यां तडागे वा वाप्यां कूपे गृहेऽपि वा । गत्वा गिरौ वने वापि यत्र वा प्राप्यते शिवा । क्षीरोदे मथ्यमाने तु यदा वृक्षः समुत्थितः । आमर्दनाद्देवदैत्यानां तेन सामलकी स्मृता । तस्मिन् वृक्षे स्थिता लक्ष्मीः सदा पितृगृहे नृप ! । शिवालक्ष्मीस्थितो वृक्षः सेव्यते सुरसत्तमैः । देवैर्ब्रह्मादिभिः सर्वैर्ह्यसौ वैष्णवः कृतः । तत्र गत्वा हरिः पूज्यो वृक्षमूलेऽथ वा शिवा । पूज्या पुष्पैः शुभैरात्रौ कार्यं जागरणं नरैः । अष्टाधिकशतैः कार्या फलैः सङ्ख्याः प्रदक्षिणा । प्रदक्षिणीकृत्य ततो भोक्तव्यं तु फलं नरैः । करकं जलपूर्णं तु कर्त्तव्यं पात्रसंयुतम् । हविष्याद्यन्नु कर्त्तव्यं कथाश्रवणतत्परैः । मुच्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः । देहान्ते ये नराः पूर्वं पूज्यन्ते हरिमन्दिरम्" ।

एतानि व्रतानि प्रायेण हेमाद्रिव्रतखण्डोक्तानि प्रसक्तागतान्यपि कानिचिदुक्तानि । अन्यान्यपि व्रतार्कादावुक्तानि द्रष्टव्यानि नैमित्तिकानि प्राजापत्यादीनि व्रतानि तु तत्तच्छब्दे उक्तानि द्रष्टव्यानि । [१विस्तारे च अमरः ।

**व्रतति** स्त्री प्रत—अति पृषो० वा ङीप् । १लतायाम् ।

**व्रतभिक्षा** स्त्री व्रताङ्गं भिक्षा । उपनयनकालविहितभिक्षायां तद्विधिः संस्कारतत्त्वे दर्शितो यथा "अथ भैक्ष्यञ्चरति" । अथ शब्दस्तु सूर्य्यादित्योपस्थानमग्निप्रदक्षिणञ्च शंसति । "प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् । प्रदक्षिणं परीत्याग्निं चरेद्भैक्ष्यं यथाविधि" इति मनुवचनात् । "भिक्षासमूहं भैक्ष्यं चरति आहरति इत्यर्थः । "मातरमेवाग्रे ये चान्ये सुहृदो यावन्तो वा सन्निहिताः स्युः" । याचते इत्यध्याहार्य्यम् । सुहृदः स्निग्धहृदयः स्वस्रादयः तथाच मनुः "मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् । भिक्षेत भिक्षां प्रथमं याचैनं नावमानयेत्" । सन्निहितास्तद्देशस्थाः न तु प्रतिगृहं गत्वा । (भवति ! भिक्षां देहीति) ब्राह्मणभिक्षा प्रयोगः । तथा च मनुः "भवत्पूर्वं चरेत् भैक्ष्यमुपवीतो द्विजोत्तमः । भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्" । "आदिमध्यावसानेषु भवच्छब्दोपलक्षिता । ब्राह्मणक्षत्रियविशां भैक्ष्यचर्य्या यथाक्रमम्" इति याज्ञवल्क्यवचनाच्च । आचार्य्याय भैक्ष्यं प्रतिपाद्य वेदयति (समर्पयति) भोरिति" । "आचार्य्याय निवेद्य प्रतिगृह्णीयादिति" गृह्यान्तरवचनात् । भैक्ष्यं भोरिति निवेदनमन्त्रः । भैक्ष्यस्य संस्कारार्थत्वात् आचार्य्याय निवेद्य स्वयं तदेव भुञ्जीत । तथा च मनुः "समाहृत्य तु तद्भैक्ष्यं यावदन्नममायया । निवेद्य गुरवेऽश्नीयात् आचाम्य प्राङ्मुखः शुचिः" । आचार्य्यश्च माणवकाय भैक्ष्यं प्रदाय कर्म्मशेषं समापयेत्" ।

**व्रतसंग्रह** पु० ६त० । व्रतग्रहणार्थं कृतदीक्षायाम् । हेमच०

**व्रतादेश** पु० व्रतमादिश्यतेऽत्र आ+दिश आधारे ल्युट् । उपनयने तत्र हि आचार्य्येण माणवकस्य व्रतमादिश्यते ।

**व्रतिन्** पु० व्रतमस्त्यस्य इनि । १व्रतधारके २यजमाने च । अमरः ।